# संस्कृतकाव्यशास्त्रे रससिद्धान्तसमीक्षणम्

डा.महानन्दतिमिल्सिना
सहप्राध्यापकः : साहित्यम्
नेपालसंस्कृतविश्वविद्यालयः, पिण्डेश्वरविद्यापीठम्, धरानः,
timsinamahananda@gmail.com

https://doi.org/10.3126/pj.v5i8.73798

**लेखसारः**

संस्कृतकाव्यशास्त्रपरम्परायां रससिद्धान्तः सकलानामपि काव्यसिद्धान्तानां शिरोमणिरूपेण विराजितो वर्तते। रससिद्धान्तस्य चिन्तनपरम्परा अतीव प्राचीनतमा संलक्ष्यते। रससिद्धान्तः गुणालङ्काररीतिवक्रोचित्य–सिद्धान्तेषु लोकप्रियो व्यापकश्च विद्यते। गुणालङ्कारादयोऽन्ये सिद्धान्ता रससिद्धान्तस्यैव परिपोषकाः प्रतीयन्ते। काव्यशास्त्रपरम्परायां रससिद्धान्तस्तु काव्यसिद्धान्तस्य पर्यायरूपेणैव विराजितो वर्तत। रससिद्धान्तस्य प्रवर्तकः प्रथमशताब्द्यां जातो भरतमुनिरेव। भरतेन स्वकीये नाट्यशास्त्रे 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति सूत्रं प्रतिपादितम्। एतद् रससूत्रं पश्चाद्वर्तिभिर्भट्टलोल्लट-प्रभृतिभिर्विद्वद्भिर्व्याख्यातम्। रसशब्दस्य प्रयोगस्तु वैदिककालादेव जातो दृश्यते। रसशब्दः शृङ्गारविषवीर्यादिविविधेष्वर्थेषु प्रयुक्तोऽस्ति। संस्कृतकाव्यशास्त्रे तु शृङ्गारादौ रसशब्दः प्रसिद्धः। रस्यते आस्वाद्यते इति रसः, रसनं रसः आस्वाद इति व्युत्पत्तिद्वयं साहित्यिके रसशब्दे प्रचलितं सान्दर्भिकञ्च। भरतमुनिपश्चाद्वर्तिभिराचार्यैरानन्दवर्धन-भट्टलोल्लट-शङ्कुक-भट्टनायकाभिनवगुप्त-मम्मट-विश्वनाथ-जगन्नाथादिभिराचार्यै रसस्य विस्तरेण विवेचनं कृतम्। तदनन्तरं रुद्रटादय आचार्या अपि रसस्य महत्तां प्रतिष्ठापयन्तः काव्ये रसस्यावश्यकतामुद्घोषयन्ति। ध्वनिवादी आनन्दवर्धनाचार्योऽपि रसं व्यङ्ग्यं स्वीकृत्य वस्त्वलङ्काररसध्वनीनां चर्चां विधाय काव्ये रसध्वनेरुत्कृष्टतां प्रतिपादयति। आचार्य विश्वनाथः रसात्मकं वाक्यं काव्यं कथयन् रसं काव्यस्यात्मरूपेण विवेचयति। पण्डितराजो जगन्नाथोऽपि स्वकीये रसगङ्गाधरग्रन्थे दार्शनिकदृष्ट्या रसस्य सूक्ष्मरूपेण विवेचनं विदधाति। अस्मिन् लेखे पौरस्त्यकाव्यशस्त्रिभिः प्रतिपादितस्य रसतत्त्वस्य विवेचनं विहितमस्ति। लेखोऽयं गुणात्मिकायामनुसन्धानपद्धत्यामाधारितो विद्यते। अस्मिननुसन्धाने द्वितीयकस्रोतयुतानां सामग्रीणां संयोजनं वर्तते।

*बीजशब्दाः* अनुभावः, रससिद्धान्तः, विभावः, सञ्चारिभावः, स्थायिभावः।

## विषयपरिचयः

संस्कृतकाव्यशास्त्रपरम्परायां विविधाः सिद्धान्ताः प्रतिपादिताः सन्ति । काव्यरचनायाः सन्दर्भे रचितानां काव्यानां पर्यालोचनसन्दर्भे च काव्यसिद्धान्ता उपयोगिनो भवन्ति । पौरस्त्यकाव्यपरम्परायां रसध्वनिगुणरीतिवक्रोक्त्यौचित्यालङ्कारसिद्धान्ताः समादरणीया विद्यन्ते । काव्यं रमणीयं विधातुं काव्यशास्त्रस्य ज्ञानमावश्यकं भवति, काव्यविश्लेषणमपि काव्यसिद्धान्तस्याधारेणैव विधीयते । संस्कृतकाव्यशास्त्रे कतियये आचार्या काव्यस्य बाह्यसौन्दर्यसमेधकानामलङ्कारादितत्त्वानां प्राधान्यं प्रस्तुवन्ति चेत् कतिपयेऽभ्यन्तरसौन्दर्यपरिपोषकानां रसादितत्त्वानां प्राधान्यं प्रदर्शयन्ति । बाह्याभ्यन्तरिकानां तत्त्वानां सम्मेलनेनैव काव्यं रमणीयं जायते । प्रस्तुते लेखे काव्यशास्त्रपरम्परायां संलक्षितस्य रससिद्धान्तस्य समीक्षणं विधीयते । रससिद्धान्तस्य प्रवर्तकः प्रथमशताब्द्यां जातो भरतमुनिरेव । भरतेन स्वकीये नाट्यशास्त्रे 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति सूत्रं प्रतिपादितम् । एतद् रससूत्रं पश्चाद्वर्तिभिर्भट्टलोल्लट-प्रभृतिभिर्विद्वद्भिर्व्याख्यातम् । रसशब्दस्य प्रयोगस्तु वैदिककालादेव जातो दृश्यते । रसशब्दः शृङ्गारविषवीर्यादिविविधेष्वर्थेषु प्रयुक्तोऽस्ति । संस्कृतकाव्यशास्त्रे तु शृङ्गारादौ रसशब्दः प्रसिद्धः । रस्यते आस्वाद्यते इति रसः, रसनं रसः आस्वाद इति व्युत्पत्तिद्वयं साहित्यिके रसशब्दे प्रचलितं सान्दर्भिकञ्च । रससिद्धान्तप्रतिपादने वाल्मीकिरामायणस्योल्लेख्या भूमिका दृश्यते । यतो ग्रन्थेऽस्मिन् करुणरसस्य तथान्येषां रसानामपि समुचितो विन्यासो दृश्यते । भरतमुनिपश्चाद्वर्तिभिराचार्यैरानन्दवर्धन-भट्टलोल्लट-शङ्कुक-भट्टनायकाभिनवगुप्त-मम्मट-विश्वनाथ- जगन्नाथादिभिराचार्यै रसस्य विस्तरेण विवेचनं कृतम् । तत्र भट्टलोल्लटो रससूत्रे विद्यमानस्य संयोगादित्यस्य जन्यजनकभावरूपात् सम्बन्धादित्यर्थं कृत्वा रसं विभावादीनां कार्यं कथयति । शङ्कुकः संयोगादित्यस्यानुमाप्यानुमापकसम्बन्धादित्यर्थं कृत्वा विभावादिभी रसस्यानुमानं स्वीकरोति । एवमेव भट्टनायकः संयोगादित्यस्य भोज्यभोजकभावरूपात् सम्बन्धादित्यर्थं कृत्वा अभिधाभिन्नयोर्भावकत्वभोजकत्वव्यापारयोर्माध्यमेन रसो भोज्यते इत्यर्थं प्रतिपादयति । एवञ्चाभिनवगुप्तः संयोगादित्यस्य व्यङ्ग्यव्यञ्जकरूपसम्बन्धमुपस्थाप्य विभावादिभी रसो व्यज्यत इत्यर्थं प्रकटयति । तदनन्तरं रुद्रटादय आचार्या अपि रसस्य महत्तां प्रतिष्ठापयन्तः काव्ये रसस्यावश्यकतामुद्घोषयन्ति । ध्वनिवादी आनन्दवर्धनाचार्योऽपि रसं व्यङ्ग्यं स्वीकृत्य वस्त्वलङ्काररसध्वनीनां चर्चां विधाय काव्ये रसध्वनेरुत्कृष्टतां प्रतिपादयति । अग्निपुराणेऽपि 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इत्युक्त्या काव्ये रसस्य प्रधानता प्रतिपाद्यते । आचार्य विश्वनाथः 'वाक्यं रसात्मकं काव्यम्' इति कथयन् रसं काव्यस्यात्मरूपेण विवेचयति । पण्डितराजो जगन्नाथोऽपि स्वकीये रसगङ्गाधरग्रन्थे दार्शनिकदृष्ट्या रसस्य सूक्ष्मरूपेण विवेचनं विदधाति । मूलतो रसानुभूतौ विभावादीनामुल्लेख्या भूमिका वर्तते ।

### समस्याकथनम्

संस्कृतकाव्यशास्त्रे रससिद्धान्तसमीक्षणम् इत्यस्मिन् लेखे निम्नाङ्किताः समस्याः समागताः सन्ति –

क. संस्कृतकाव्यशास्त्रानुसारेण रसस्वरूपं कीदृशम् ?

ख. संस्कृतकाव्यशास्त्रपरम्परायां रससिद्धान्तस्य स्थितिः कीदृशी ?

**उद्देश्यम्**

अध्ययनमेतत् निम्नाङ्कितयो उद्देश्ययोः केन्द्रितमस्ति –

क. संस्कृतकाव्यशास्त्रानुसारेण रसस्वरूपप्रकाशनम्,

ख. संस्कृतकाव्यशास्त्रपरम्परायां रससिद्धान्तस्य समीक्षणम्,

**अध्ययनविधिः**

प्रस्तुतमध्ययनं गुणात्मिकायामनुसन्धानपद्धत्यामाधारितं विद्यते । अध्ययनेऽस्मिन् पुस्तकालयीयानां सामग्रीणामुपयोगोऽस्ति । संस्कृतकाव्यशास्त्रिभिर्विरचितानि रससिद्धान्तविषयकानि पुस्तकान्यप्यत्र सामग्रीरूपेण प्रस्तुतानि विद्यन्ते । रससिद्धान्तविषये लिखिता विचाराः, लेखाश्चात्र सङ्कलनं विधाय विश्लेषणं विहितं वर्तते । अत्र सङ्कलितानां सामग्रीणां व्याख्याविश्लेषणे वर्णनात्मकस्य व्याख्यात्मकस्य च विधेरुपयोगो विहितोऽस्ति ।

**सीमाङ्कनम्**

अस्मिनध्ययने संस्कृतकाव्यशास्त्रान्तर्गतस्य रससिद्धान्तस्य विषये समीक्षणं कृतं विद्यते । संस्कृतकाव्यशास्त्रपरम्परायां गुणालङ्काररीतिवक्रोक्त्यौचित्यप्रभृतीनां सिद्धान्तानामपि महती भूमिका संलक्ष्यते परमस्मिन् लेखेऽन्येषां काव्यसिद्धान्तानां समीक्षा नैव विहिता । अत्र केवलं रससिद्धान्तस्यैव चर्चा विहिता । इयमेवास्य लेखस्य सीमा वर्तते ।

**पूर्वकार्यसमीक्षणम्**

अस्मिन् लेखे चम्पूरामायणकाव्यस्य बालकाण्डगतानां सौन्दर्याणामनुशीलनं विहितमस्ति । एतत्शीर्षकसम्बद्धानि पूर्वकार्याणि क्रमिकरूपेणात्र सङ्क्षेपेण प्रस्तूयन्ते -

विश्वनाथः साहित्यदर्पणः (ई. १९९४) इति लाक्षणिके ग्रन्थे रसस्वरूपविषयकं मतं स्थापयति – रसः सत्त्वगुणस्याधिक्याद् विभावादिसमूहेनाखण्डः स्वतः प्रकाशमानः सुखमयः, ज्ञानरूपः, वेद्यान्तरपदार्थसम्पर्कशून्यः, ब्रह्मसाक्षात्कारसदृशः अलौकिकचमत्कारप्राणस्वरूपो भवति । रसोऽयं सहृदयैरात्माकृतिवदभिन्नत्वेनानुभूयते -

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मानन्दसहोदरः ॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥ (विश्वनाथः, ३/२-३)

कृष्णकुमारः 'अलङ्कारशास्त्र का इतिहास' (ई. १९९८) इति पुस्तकस्य 'रससम्प्रदायः' इति शीर्षकमाध्यमेन रसस्वरूपं विवेचयति । अत्रासौ विविधानामाचार्याणां रसविषयकं मतं चोपस्थापयति । असौ रसपदप्रयोगस्य प्राचीनपरम्परां च प्रस्तौति –

तैत्तिरीयोपनिषदि परब्रह्म रसनाम्ना कथ्यते - रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति (२/७) । भरतमुनिनाऽथर्ववेदे रसस्य चर्चा विहितास्तीति विषयोऽप्यनेन सङ्केतितः - जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च । यजुर्वेदादभिनयान् रसानाथर्वणादपि (नाट्यशास्त्रम् १/१७) । एवञ्चानेन रसपदस्य व्युत्पत्तयोऽपि प्रस्तुताः, यथा -

(क) रस्यते आस्वाद्यत इति रसः (ख) रस्यते अनेन इति रसः (ग) रसति रसयति वा इति रसः (घ) रसनं रसः आस्वादः । एतासु व्युत्पत्तिषु चतुर्थी व्युत्पत्तिरेव साहित्यिकः रस इति प्रतिपादयति (कृष्णकुमार, ई.१९९८ पृ.२३४) ।

मम्मटः काव्यप्रकाशः (ई. १९९८) इति ग्रन्थे रसस्वरूपं प्रतिपादयति, मम्मटानुसारं लोके रत्यादेः स्थायिनो यानि कारणकार्यसहकारीणि तान्येव काव्ये नाट्ये च विभावानुभावव्यभिचारिणः कथ्यन्ते । एतैर्व्यक्तः स्थायिभाव एव रस इति यत् -

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥
विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥ (मम्मटः, ४/२७-२८)

डा.राजवंश सहाय 'हीरा' 'संस्कृत साहित्य-कोश' (ई.२००२) इति कोशस्य 'रससम्प्रदायः' इति शीर्षकेऽस्य सम्प्रदायस्य विवेचनं करोति । तस्यानुसारं रससम्प्रदायः संस्कृतकाव्यशास्त्रस्य सर्वाधिकः प्राचीनतमः सिद्धान्तः । अस्य सम्प्रदायस्य संस्थापको भरतमुनिः । भरतमुनिप्रणीते नाट्यशास्त्रे रसस्य सूक्ष्मं वैज्ञानिकं व्यावहारिकञ्च विवेचनं कृतमस्ति । अनेनाष्टसङ्ख्यका रसा विवेचिताः । 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इत्यस्य रससूत्रम् । अस्य रससूत्रस्य व्याख्यायां

भट्टलोल्लटस्योत्पत्तिवादः, श्रीशङ्कुकस्यानुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्याभिव्यक्तिवाद इति सिद्धान्ता विकसिताः (राजवंश, ई.२००२, पृ.१३०)।

आचार्यरामचन्द्र मिश्रः 'संस्कृतसाहित्येतिहासः' (ई.२०१०) इति पुस्तकस्य 'साहित्यशास्त्रम् अलङ्कारशास्त्रम् वा' इति शीर्षके रससम्प्रदायस्य परिचयं प्रकटयति - सम्प्रत्युपलभ्यमानो रससिद्धान्तो भरतेन प्रवर्तित । तदीयम् 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति सूत्रमेव रसस्वरूपनिर्णायिकेष्वादिमं प्रसिद्धम् । ततः प्राचीनानां नन्दिकेश्वरप्रभृतीनां मतं नोपलभ्यते । भरतेन स्वीयनाट्यशास्त्रस्य षष्ठे सप्तमे चाध्याये रसस्य विषये स्वमतं प्रकाशितम् । तत्र भरतसूत्रं बहुभिर्व्याख्यातम् । भट्टलोल्लटप्रभृतयः संयोगादित्यस्य जन्यजनकभावरूपात्सम्बन्धादित्यर्थं कृत्वा रसं विभावादीनां कार्यमाहुः । शङ्कुकादयस्तु संयोगादित्यस्य अनुमाप्यानुमापकसम्बन्धादित्यर्थं कृत्वा विभावादिभिः रसस्यानुमानं स्वीकृतवन्तः । भट्टनायकादयश्च संयोगादित्यस्य भोज्यभोजकभावरूपात्सम्बन्धादित्यर्थमभिप्रयन्तः अभिधातोऽन्यत्भावकत्वभोजकत्वनामकं व्यापारद्वयं कल्पयन्तश्च विभावादिभी रसो भोज्यत इत्याहुः अभिनवगुप्तादयश्च व्यङ्ग्यव्यञ्जकभावं सम्बन्धं मन्यमाना रसं व्यङ्ग्यमभिदधत्ते (मिश्रः, ई.२०१०, पृ.१८९)।

आनन्दवर्धनाचार्यः ध्वन्यालोकः (ई.२०११) ग्रन्थस्य ध्वनिविवेचनक्रमेऽलङ्काराणां रसभावादितात्पर्येण विनिवेशनमावश्यकं भवतीति प्रतिपादयति -

रसभावादितात्पर्यमाश्रित्य विनिवेशनम्।
अलङ्कृतीनां सर्वासामलङ्कारत्वसाधनम्॥ (आनन्दवर्धनः, पृ.२०८)

आचार्यो जगन्नाथ रसगङ्गाधरः (ई.२०१२) इति लाक्षणिके ग्रन्थेऽभिनवगुप्तमम्मटादीनां रसविषयकं मतं विविच्य चिद्विशिष्टो रत्यादिरेव रस इति स्वाभिप्रायं प्रस्तौति -

भग्नावरणा चिद्विशिष्टा रत्यादिः स्थायी भावो रसः। (जगन्नाथः, पृ.९६)

कुलचन्द्र गौतमः अमरकोशः (२०१७) इति कोशे रसशब्दस्य विविधानर्थान् प्रकटयति - शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः (३/२७८९)। अत्रासौ रसशब्दः शृङ्गारविषवीर्यादिविविधेष्वर्थेषु प्रयुक्तोऽस्तीति प्रस्तौति।

अनेन प्रकारेण रससिद्धान्तस्य विषये विविधैः समीक्षकैर्विविधेषु सन्दर्भेषु समीक्षणं कृतं दृश्यते । मूलतो रसवादिभिः आचार्यैर्भिन्नभिन्नरूपेण स्वकीयविचाराः प्रस्तुताः । कतिपयैः समीक्षकै रससम्प्रदायस्य विषये समग्रं समीक्षणमपि विहितमस्ति परं संस्कृतकाव्यशास्त्रपरम्परायां रससिद्धान्तस्य मूल्याङ्कनं स्थाननिर्धारणञ्चेति विषये विशदं समीक्षणं नैव कृतमवलोक्यते। अतोऽनुसन्धानमेतत् नवीनविषयप्रतिपादने समर्थोऽस्तीति ज्ञायते।

## विषयविश्लेषणम्

### रसस्वरूपम्

रससिद्धान्तस्य प्रवर्तकः प्रथमशताब्द्यां जातो भरतमुनिरेव । भरतेन स्वकीये नाट्यशास्त्रे 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' (भरतमुनिः, ई.१९४३, पृ.९५) इति सूत्रं प्रतिपादितम् । एतद् रससूत्रं पश्चाद्वर्तिभिर्भट्टलोल्लटप्रभृतिभिर्विद्वद्भिर्व्याख्यातम् । रसशब्दस्य प्रयोगस्तु वैदिककालादेव जातो दृश्यते । रसशब्दः शृङ्गारविषवीर्यादिविविधेष्वर्थेषु प्रयुक्तोऽस्ति । यथा - शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः (गौतमः, २०१७, पृ. २९१) ।

संस्कृतकाव्यशास्त्रे तु शृङ्गारादौ रसशब्दः प्रसिद्धः । रस्यते आस्वाद्यते इति रसः, रसनं रसः आस्वाद इति व्युत्पत्तिद्वयं साहित्यिके रसशब्दे प्रचलितं सान्दर्भिकञ्च । रससिद्धान्तप्रतिपादने वाल्मीकिरामायणस्योल्लेख्या भूमिका दृश्यते । यतो ग्रन्थेऽस्मिन् करुणरसस्य तथान्येषां रसानामपि समुचितो विन्यासो दृश्यते । भरतमुनिपश्चाद्वर्तिभिराचार्यैरानन्दवर्धन-भट्टलोल्लट-शङ्कुक-भट्टनायकाभिनवगुप्त-मम्मट-विश्वनाथ-जगन्नाथादिभिराचार्यै रसस्य विस्तरेण विवेचनं कृतम् । तत्र भट्टलोल्लटो रससूत्रे विद्यमानस्य संयोगादित्यस्य जन्यजनकभावरूपात् सम्बन्धादित्यर्थं कृत्वा रसं विभावादीनां कार्यं कथयति । शङ्कुकः संयोगादित्यस्यानुमाप्यानुमापकसम्बन्धादित्यर्थं कृत्वा विभावादिभी रसस्यानुमानं स्वीकरोति । एवमेव भट्टनायकः संयोगादित्यस्य भोज्यभोजकभावरूपात् सम्बन्धादित्यर्थं कृत्वा अभिधाभिन्नयोर्भावकत्व-भोजकत्वव्यापारयोर्माध्यमेन रसो भोज्यते इत्यर्थं प्रतिपादयति । एवञ्चाभिनवगुप्तः संयोगादित्यस्य व्यङ्ग्यव्यञ्जकरूपसम्बन्धमुपस्थाप्य विभावादिभी रसो व्यज्यत इत्यर्थं प्रकटयति (मिश्र, २०१०, पृ.१८९) । तदनन्तरं रुद्रटादय आचार्या अपि रसस्य महत्तां प्रतिष्ठापयन्तः काव्ये रसस्यावश्यकतामुद्घोषयन्ति (राजवंश, २००२, पृ.१३१) । ध्वनिवादी आनन्दवर्धनाचार्योऽपि रसं व्यङ्ग्यं स्वीकृत्य वस्त्वलङ्काररसध्वनीनां चर्चां विधाय काव्ये रसध्वनेरुत्कृष्टतां प्रतिपादयति । अग्निपुराणेऽपि "वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्" इत्युक्त्या काव्ये रसस्य प्रधानता प्रतिपाद्यते (राजवंश, २००२, पृ.१३१) । आचार्य विश्वनाथः "वाक्यं रसात्मकं काव्यम्" इति कथयन् रसं काव्यस्यात्मरूपेण विवेचयति । पण्डितराजो जगन्नाथोऽपि स्वकीये रसगङ्गाधरग्रन्थे दार्शनिकदृष्ट्या रसस्य सूक्ष्मरूपेण विवेचनं विदधाति (राजवंश, २००२, पृ.१३१) ।

रसस्वरूपविषये चतुर्दशशतकजातस्य विश्वनाथस्य मतमेतादृशमस्ति यत् - रसः सत्त्वगुणस्याधिक्याद् विभावादिसमूहेनाखण्डः स्वतः प्रकाशमानः सुखमयः, ज्ञानरूपः, वेद्यान्तरपदार्थसम्पर्कशून्यः,

ब्रह्मसाक्षात्कारसदृशः अलौकिकचमत्कारप्राणस्वरूपो भवति । रसोऽयं सहृदयैरात्माकृतिवदभिन्नत्वेनानुभूयते -

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मानन्दसहोदरः ॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥ (साहित्यदर्पणः, ३/२-३)

एवञ्चालौकिकविभावत्वं प्राप्य करुणादिरसेभ्योऽपि सुखमेव सञ्जायते -

करुणादावपि रसे जायते यत्परं सुखम् ।
सचेतसामनुभवप्रमाणं तत्र केवलम् ॥ (साहित्यदर्पणः, ३/४)

वैदिकग्रन्थेऽपि 'रसो वै सः' इत्युक्त्वा रसस्य परब्रह्मणा सहाऽभेदसम्बन्धः स्वीकृतोऽस्ति (उपाध्याय, २०५५, पृ. १८) । विभावानुभावसञ्चारिभावरूपाभिः सामग्रीभिरभिव्यक्तः/सहृदयानां हृदि विद्यमानो रत्यादिः स्थायीभावो व्यञ्जनावृत्या रसरूपे परिणमतीति विश्वनाथो रसस्य परिचयं प्रस्तौति -

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ॥ (साहित्यदर्पणः, ३/१)

एवमेव मम्मटानुसारं लोके रत्यादेः स्थायिनो यानि कारणकार्यसहकारीणि तान्येव काव्ये नाट्ये च विभावानुभावव्यभिचारिणः कथ्यन्ते । एतैव्यक्तः स्थायिभाव एव रस इति -

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥
विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥ ( काव्यप्रकाशः, ४/२७-२८)

आचार्यो जगन्नाथश्चाभिनवगुप्तमम्मटादीनां रसविषयकं मतं विविच्य चिद्विशिष्टो रत्यादिरेव रस इति स्वाभिप्रायं प्रस्तौति - भग्नावरणा चिद्विशिष्टा रत्यादिः स्थायी भावो रसः (रसगङ्गाधरः, पृ.९६) । मूलतो रसानुभूतौ विभावादीनामुल्लेख्या भूमिका वर्तते । अतोऽस्मिन् सन्दर्भे विभावादीनां रसतत्त्वानां परिचयः प्रस्तूयते ।

**रसावयवाः**

सहृदयानां हृदि विद्यमाना रत्यादिरूपा चित्तवृत्तिः काव्यनाट्ययोर्विभावादिभिः सामग्रीभिः संवलिता सती रसस्वरूपतामेति । सामाजिकानामन्तःकरणे वासनात्मकतयाऽवस्थिताश्चित्तवृत्तयः काव्यशास्त्रे

भावनाम्नाऽभिधीयन्ते । रसानुभूतौ रत्यादेर्भावस्योद्बोधका विभावाः, उद्बुद्धानां रत्यादिभावानां बहिः प्रकाशका अनुभावाः, स्थायिभावे विशेषतया सञ्चरणशीला व्यभिचारिणः कथ्यन्ते । लोके रतिशोकादीनामन्तर्वृत्तीनां प्रकाशकाः कारणकार्यसहकारिभावा एव काव्ये नाट्ये च विभावानुभावव्यभिचारिभावनाम्ना व्यवह्रियन्ते ।

एभिर्विभावानुभावव्यभिचारिभिर्भावैः परिपुष्टो रत्यादिस्थायिभाव एव रसतामेति । अतो रसानुभूतौ कारणभूता विभावानुभावव्यभिचारिभावस्थायिभावा एव रसावयवा मन्यन्ते ।

**विभावः** - लोके रत्यादेर्भावस्योद्बोधका एव काव्यनाट्ययोर्विभावाः (रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः (साहित्यदर्पणः, ३/२९) । 'विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिः' इति विभावपदस्य व्युत्पत्तिर्दृश्यते । विभावस्य च आलम्बनोद्दीपनाख्यौ द्वौ भेदौ स्तः । तत्र नायकादिकमवलम्ब्य रसोद्गमाद् नायकादिरालम्बनविभावः । ये रत्यादीन् स्थायिभावानुद्दीपयन्ति ते उद्दीपनविभावाः । आलम्बनस्य चेष्टा, देश-काल-चन्द्र-चन्दन-कोकिलालाप-भ्रमरझङ्कारादीनि उद्दीपनानि भवन्ति -

उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ।
आलम्बनस्य चेष्टाद्या देशकालादयस्तथा ॥ (साहित्यदर्पणः, ३/१३१)

**अनुभावः -** लोके आलम्बनोद्दीपनकारणैर्नायिकस्यान्तःकरणे उद्बुद्धं रत्यादिकं बहिः प्रकाशयत् कार्यमुच्यते, तदेव काव्यनाट्ययोरनुभावः कथ्यते –

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्यरूपः सोऽनुभावकाव्यनाट्ययोः ॥ (साहित्यदर्पणः, ३/१३२)

स्त्रीपुरुषाणां भावहावहेलारूपा अङ्गजा अलङ्काराः, लीलाविलाससदृशाः स्वभावजा अलङ्काराः, एवमेव स्तम्भस्वेदरोमाञ्चस्वर-भङ्गवेपथुप्रभृतयः सात्त्विकभावाश्चानुभावाः –

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथूः ।
वैवर्ण्यमश्रु प्रलयं इत्यष्टौ सात्त्विकाः स्मृताः ॥ (साहित्यदर्पणः, ३/१३३)

**व्यभिचारिभावः -** रसप्रकाशनार्थं विभावानुभावापेक्षया विशेषादाभिमुख्येन सञ्चरणशीलो भावो व्यभिचारिभावः सञ्चारिभावो वा कथ्यते । एष व्यभिचारिभावः स्थायिभावे जले बुद्बुदवद् उन्मग्ननिर्मग्नरूपेण तिष्ठति -

विशेषादाभिमुख्येन चरणाद् व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्विदाः ॥ (साहित्यदर्पणः, ३/१४०)

एते व्यभिचारिणस्त्रयत्रिंशद् भेदयुता दृश्यन्ते । ते च निर्वेदावेगदैन्यश्रममदजडतौग्र्य-मोहविबोधस्वप्नापस्मारगर्वमरणमलसतामर्षनिद्रावहित्थौत्सुक्योन्मादशङ्कास्मृतिमतिव्याधि-सन्त्रासलज्जाहर्षासूयाविषादधृतिचपलताग्लानि-चिन्ता-वितर्काख्याः सन्ति –

निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः
स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्था।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसन्त्रासलज्जा
हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः ॥ (साहित्यदर्पणः, ३/१४१)

स्थिररूपेण विद्यमाने रत्यादावेते प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन सञ्चरन्ति।

**स्थायिभावः -** रसस्याविर्भावेऽनुकूलाः प्रतिकूला वा भावा यं तिरोधातुं न क्षमन्ते प्रत्युत यस्यानुकूल्येन साहाय्यमाचरन्ति असौ स्थायिभावः। रसास्वादनकाले ह्यसावानन्दाङ्कुरकन्दरूप एव। स्थायिभावोऽन्यैर्भावैर्न तिरोधीयते, अपि त्वत्यर्थं पुष्यते एव –

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः ॥ (साहित्यदर्पणः, ३/१७४)

एते स्थायिभावा रतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयशमभेदेन नवप्रकारका दृश्यन्ते -

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च ॥ (साहित्यदर्पणः, ३/१७५)

विभावानुभावव्यभिचारिभावैः सामाजिकानां हृदि स्थिरतया विद्यमान एष एव स्थायिभाव रसरूपतां परिणमति।

मूलरूपेणाचार्यैर्नवप्रकारका रसा मन्यन्ते। तत्र शृङ्गारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतशान्ताश्चेति -

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्सोऽद्भुत इत्यष्टौ रसाः, शान्तस्तथा मतः ॥ (साहित्यदर्पणः, ३/१८२)

आचार्यौ भरतधनञ्जयौ नाट्ये शान्तभिन्नानष्ट रसान् स्वीकुरुतः । रुद्रटेन प्रेयान् नामकोऽन्यो रसोऽपि स्वीकृतः । विश्वनाथप्रभृतयस्तु वत्सलं दशमं रसं स्वीकुर्वन्ति । एवञ्च रूपगोस्वामिप्रभृतयो गौडीयवैष्णवा भक्तिरसं प्राधान्येन स्वीकुर्वन्ति। एतेषां रसभेदानुसारं स्थायिभावानामपि सङ्ख्याभेदः संलक्ष्यते।

**रसाभिव्यक्तिप्रक्रिया**

विभावानुभावव्यभिचारिभिर्व्यञ्जनावृत्त्याऽभिव्यक्तः सहृदयानां रत्यादिः स्थायिभावो रसरूपतामेति । लौकिकाः शोकहर्षादयः काव्यसंश्रयेणालौकिकं विभावत्वं प्राप्य सुखरूपा जायन्ते -

हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात् ।
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः ॥
अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् ।
सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः ॥ (साहित्यदर्पणः, ३/६,७)

विभावादीनां साधारणीकरणव्यापारसामर्थ्येन प्रमाता रामादावभेदबुद्या तद्गतां रतिमनुभवति -

व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः ।
तत्प्रभावेण यस्यासन् पाथोधिप्लवनादयः ॥
प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते । (साहित्यदर्पणः, ३/९)

साधारणीकरणेनैव भावको रामेण कृतानि समुद्रोल्लङ्घनादीनि कार्याणि स्वेनैव विहितानीति मनुते । तदनु नायकादीनां भावैः सह भावकस्य भावानां साधारणीकरणेन प्रमाता रामादौ विद्यमानमुत्साहादिभावं स्वयमेवानुभवति । विभावादिवत् विविधानां रसानां स्थायिभावोऽपि साधारणीकरणव्यापारेण प्रतीयते -

उत्साहादिसमुद्बोधः साधारण्याभिमानतः ।
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति ॥
साधारण्येन रत्यादिरपि तद्वत्प्रतीयते । (साहित्यदर्पणः, ३/१०)

साधारणीकरणेन रसास्वादे परस्य, न परस्येति, ममेति, न ममेतीत्यादिना सम्बन्धविशेषस्य स्वीकारः परिहारो वा न भवति -

परस्य न परस्येति ममेति न ममेति च ।
तदास्वादे विभावादेः परिच्छेदो न विद्यते ॥ (साहित्यदर्पणः, ३/१२)

रसानुभूतिस्तु प्रपाणकरसन्यायेन भवति । यथा प्रपाणकरसे खण्डमरिचकर्पूरादीनां मिश्रणात् प्राग्विभिन्ना आस्वादा जायन्ते परं संमिश्रणानन्तरं तेषामपूर्व आस्वादः प्रतीयते तथैव विभावादीनामपि सम्मेलनात् प्राक् भिन्ना प्रतीतिर्जायते परं तेषां सम्मेलनानन्तरं रसरूपेणाऽपूर्व आस्वादोऽनुभूयते-

प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते ।
ततः संमिलितः सर्वो विभावादिः सचेतसाम् ॥
प्रपाणकरसन्यायाच्चर्व्यमाणो रसो भवेत् । (साहित्यदर्पणः, ३/१५)

## रससूत्रस्य व्याख्या

भरतमुनिना 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति रससूत्रं प्रतिपादितम् । अत्र विद्यमानं संयोगशब्दं निष्पत्तिशब्दं चाश्रित्य विविधा वादाः प्रादुरभवन् । तत्र प्राधान्येन चत्वारो वादा विविधदर्शनविद्भिः प्रतिपादिता दृश्यन्ते । प्रथमं भट्टलोल्लटेन मीमांसादर्शनमाश्रित्य उत्पत्तिवादः स्थापितः, तदनु शङ्कुकेन न्यायदर्शनमाश्रित्य अनुमितिवादः प्रस्तावितः, एवमेव भट्टनायकेन साङ्ख्यदर्शनमाश्रित्य भुक्तिवादसिद्धान्तः स्थापितः, अनन्तरं अभिनवगुप्तेन च वेदान्तदर्शनमाश्रित्य अभिव्यक्तिवादः प्रस्तावितः । एतेषां सिद्धान्तानां सङ्क्षेपेणाधो विवेचनं विधीयते –

**भल्टलोल्लटस्य उत्पत्तिवादः -** उत्पत्तिवादस्य प्रवर्तको भट्टलोल्लटः । अस्य मतानुसारं विभावानाम् अनुभावानां व्यभिचारिभावानां च संयोगेन रसस्य उत्पत्तिर्भवति । अस्य मतं काव्यप्रकाशग्रन्थेऽनेन प्रकारेण निर्देशितमस्ति, यत्– 'विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणै रत्यादिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः, व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसंधानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः ।'

अत्र संयोगशब्दस्य निष्पत्तिशब्दस्य च अर्थत्रयं गृह्यते । (क) विभावैः सह स्थायिभावानाम् उत्पाद्य-उत्पादकभावः सम्बन्धः, तेन रसस्य निष्पत्तिः उत्पत्तिरित्यर्थः । (ख) अनुभावैः सह स्थायिभावानां गम्यगमकभावः सम्बन्धः, तेन रसस्य निष्पत्तिः प्रतीतिरित्यर्थः । (ग) व्यभिचारिभावैः सह स्थायिभावानां पोष्यपोषकभावः सम्बन्धः, तेन रसस्य निष्पत्तिः पुष्टिरित्यर्थः ।

अस्यानुसारं रसो मुख्यतयाऽनुकार्ये रामादावेव जायते । नटे तु तद्रूपानुसन्धानादेव प्रतीतिर्भवति । नटादीनां वेशभूषादिभिर्दर्शकानां तथाविधं रसाप्लुतत्वं यथा नटेऽपि तेषां रामादिबुद्धिः । एतादृशो भ्रम एवानन्दभूतेः कारणम् । अनुकार्याणां रामादीनामेव रसास्वादो भवति, दर्शकानां रसानुभूतिस्तु नटादीनां माध्यमेनैव सञ्जायते । दर्शकानां रसानुभूतिस्तु गौणी एव । भट्टलोल्लटस्य व्याख्या मीमांसादर्शनाश्रिता वर्तते । अस्यानुसारं विषये एव रसोत्पादनस्य क्षमता । रसो वाच्यो भवति, न तु व्यङ्ग्यः । अस्य मतम् उत्पत्तिवादः, तात्पर्यवादः, आरोपवाद वा कथ्यते । यथा मीमांसामते यजमानः पुरोहितादिमाध्यमेन यज्ञस्य फलमवाप्नोति, तथैव दर्शकानां रसप्रतीतिरभिनेतृणां माध्यमेन सञ्जायते ।

भट्टलोल्लटस्य व्याख्यायां उत्तरवर्तिभिराचार्यैः कतिपये दोषाः प्रदर्शिताः । रसानुभूतिर्मुख्यरूपेण अनुकार्ये, गौणरूपेण च नटे वर्तते । सामाजिकानां दर्शकानां वा कथं रसानुभूतिः ? अनुकार्ये रामादौ रसः, तेषां जगत्यभावेन तन्निमित्तकेनाभिनयेन अभिनेतृष्वपि कथं रसोत्पत्तिर्जायते ? सामाजिकानां रसप्रतीतिरेव रसः, तेषु स्वाभाविकी अनुभूतिः कथम् ? सामाजिकहृदि रसानुभूतेरभावात् सिद्धान्तोऽयं दोषपूर्णः संलक्ष्यते ।

**शङ्कुकस्य अनुमितिवादः -** अनुमितिवादस्य प्रवर्तकः शङ्कुकोऽस्ति । अयं न्यायसम्मततया रससूत्रस्य व्याख्यां विधायाऽनुमितिवादस्य विश्लेषणं करोति । चित्रतुरगन्यायेन यथाऽवास्तविके तुरगे वास्तविकस्य तुरगस्य बुद्धिर्जायते तथैव सहृदयैः अभिनेतृषु रामादिबुद्धिमारोप्य अभिनयादिकौशलहेतुत्वाद् रसानुभूतिर्विधीयते । सामाजिकेषु विद्यमानया वासनया अनुमितिसाहाय्येन रसानुभूतिर्जायते । सामाजिकाः चित्रतुरगन्यायेन अभिनेतृषु अनुकार्यरामादिरूपताग्रहणाद् रसानुभूतिमनुमाय स्ववासनया तत्र रसानुभूतिं कुर्वन्ति । अत्र सम्यक्-मिथ्या-संशय-सादृश्यप्रतीतिभ्यो विलक्षणाया चित्रतुरगन्यायेन रामोऽयमिति प्रतिपत्त्या सामाजिकानां वासनया रसानुभूतिर्जायते ।

चित्रे दृश्यमानस्यावास्तविके घोटकेऽपि यथार्थघोटकस्य प्रतीतिर्यथा जायते तथैवाभिनये रामस्यानुपस्थितावपि सामाजिका अभिनेतायां नटे रामस्य प्रतीतिं स्वीकुर्वन्ति । अनेन प्रकारेणाभिनेतायां रामः स्वीकृते सति सामाजिकाः शिक्षाभ्यासकुशलतया तस्य कृत्रिमविभावानुभावव्यभिचारिभावान् अकृत्रिमवत् आचरन्ति स्मरन्ति च, ततः अभिनेतायां रत्यादिस्थायिभावानामनुमानं कुर्वन्ति । रत्यादिभावानामनुमितिरियं शास्त्रोक्तस्यानुमितितो विलक्षणा भवति । अनुमितिरियं परोक्षात्मिकी भवति न तु प्रत्यक्षज्ञानाश्रिता । अनेन प्रकारेण रत्यादिस्थायिभावानामभिनेतायामविद्यमानेऽपि सामाजिकाः स्वकीयहृदये निहितया वासनया स्थायिभावानामभिनेतरि अनुमानं कुर्वन्त रसमास्वादयन्ति ।

अत्र संयोगादित्यस्य अनुमाप्यानुमापकभावसम्बन्धात् इत्यर्थः । रसनिष्पत्तिरित्यस्य च रसानुमितिरित्यर्थः ।

अस्योत्तरवर्तिनामाचार्याणामनुसारमस्मिन् सिद्धान्तेऽपि केचन दोषा विद्यमाना दृश्यन्ते - अस्मिन् मतेऽनुमानेन रसानुभूतिः । किं पर्वते धूमदर्शनेन अग्नेरनुमाने कृतेऽपि अग्नेः उष्णताऽनुमानेन प्राप्तुं शक्यते ? तथैवानुकर्तृषु नटादिषु रसानुभूतेरनुमानेऽपि कथं तन्निमित्ता प्रेक्षकाणां रसानुभूतिः ? रसानुभूतिरनुमितिमूला न, अपि तु स्वानुभूतिमूला । अनुमानं बुद्धेर्विषयः, न त्वनुभूतेः, रसानुभूतिस्तु प्रत्यक्षा स्वानुभूतिमूला च । रसानुभूतिरनुमानेन साध्या न भवति ।

शङ्कुकेन विभावादीनामनुमितिहेतुर्यत्प्रतिपादितः, तत्तु कल्पितं कृत्रिमञ्च । अतोऽभिनेतरि रसानुमानेऽपि चमत्कारजनकं न । तथैव सहृदयजनेषु रसस्य प्रत्यक्षोऽनुभव एव चमत्कारजनको न त्वनुमितिः । एवमेव सामाजिकैः सीतादिविभावाः कृत्रिमा इति निश्चितरूपेण ज्ञाते सति रत्यादिभावानामनुमितिरभावात् रसानुभूतिर्न भवति ।

**भट्टनायकस्य भुक्तिवादः -** भुक्तिवादनाम्ना परिचितस्य रससिद्धान्तस्य प्रवर्तको भट्टनायकः । उत्पत्त्यनुमित्यभिव्यक्तिवादभिन्नया शैल्या तेषां सिद्धान्तानां खण्डनपूर्वकं भट्टनायकेन रससूत्रस्य व्याख्या

प्रस्तुता । आचार्योऽयं साङ्ख्यसिद्धान्तानुयायी । यथा साङ्ख्ये सुखदुःखादयोऽन्तःकरणधर्माः, न त्वात्मनः । परन्तु अन्तःकरणसम्बद्धत्वात् पुरुषेऽपि सुखदुःखादीनाम् औपाधिकी प्रतीतिः, तथैव प्रेक्षकेषु अविद्यमानोऽपि रस औपाधिकरूपेण भुज्यते। असौ रसमनुमेयं न मन्यते, अपि तु भोज्यं मन्यते। अस्य मते संयोगस्याभिप्रायो भोज्यभोजकभावोऽस्ति । निष्पत्तेः तात्पर्यं भुक्तिर्वर्तते । रसानुभूतिप्रक्रिया च त्रिविधा – अभिधा, भावकत्वं भोजकत्वं च । तत्राभिधया शब्दार्थेऽवगते भावकत्वव्यापारेण विभावादीनां साधारणीकरणं भवति । साधारणीकरणेन व्यक्तिवैशिष्ट्यादेरभावो भवति तदनु विभावादेर्निर्वैयक्तिकत्वं भवति । ततश्च भोजकत्वव्यापारेण रजस्तमसोः क्षये सत्त्वोद्रेकाद् रसो भुज्यते आस्वाद्यते इत्यर्थः।

उत्पत्तिवादे रसपर्यवसायिनः स्थायिभावस्य सत्ता प्रमुखरूपेणानुकार्ये गौणतया चाऽनुकर्तरि नटे प्रतिपादिता विद्यते, अत्र सामाजिकानां स्थानं नैव निर्धारितमस्ति। वस्तुत अनुकार्या अनुकर्ता च रसानुभूति सन्दर्भे तटस्था भवन्ति । ते रसानुभूतिं न कुर्वन्ति । अतः तटस्थेऽनुकार्येऽनुकर्तरि च रससत्तां स्वीकुर्वन् उत्पत्तिवादः सामाजिकानां स्थानमदत्वा त्रुटिं वहति। नटेऽसतः स्थायिभावस्यानुमानं विदधत्, सामाजिकानां वासनापर्यन्तं गच्छतोऽपि तटस्थेऽसत् स्थायिभावस्यानुमानं विदधदनुमितिवादोऽपि उत्पत्तिवादवत् त्रुटियुक्तः संलक्ष्यते।

चर्वणात् पूर्वमविद्यमानस्य तत्परञ्च अभाविनो रसस्याभिव्यक्तिं प्रतिपादयन् अभिव्यक्तिवादोऽपि सामाजिकानां स्थानं निर्धारयन्नपि असमीचीनः, इत्थमन्यसिद्धान्तान् खण्डयन् भट्टनायकः स्वमतं प्रस्तौति, यत् –

प्रथमतोऽभिधालक्षणातो विशेषरूपेण काव्ये नाट्ये च प्रस्तुताः कार्यकारणसहकारिणः(विभावानुभावव्यभिचारिभावाः) भावकत्वव्यापारेण साधारणीक्रियन्ते । साधारणीकरणात् सामाजिकानां स्थितिस्तन्नाट्यकाव्यगतानां पात्राणामिव जायते, यतो हि विभावानुभावव्यभिचारिणो विशिष्टतामपसरन्ति। ततः भोजकत्वव्यापारेण रसत्वेन परिणतस्याऽऽनन्दात्मकस्य स्थायिभावस्य सामाजिकैर्भुज्यते(अनुभूयते)। इदमेवास्य मतम्।

भट्टनायकेन प्रस्तुते मतेऽप्यस्योत्तरवर्तिभिः कतिपयैराचार्यैर्दोषा उपस्थाप्यन्ते । भट्टनायको ध्वनिविरोधी आचार्यः । स भावकत्वभोजकत्वव्यापारयोः कल्पनां प्रस्तौति । एतौ द्वौ व्यापारौ अनुभवसिद्धौ न । असौ स्थायिभावस्य भोगः स्वीक्रियते, स स्थायिभावः किं रामादिगतः, नटादिगतः, किं वा सामाजिकगतः । अत्र विशदीकृतं न।

**अभिनवगुप्तस्याभिव्यक्तिवादः -** अभिव्यक्तिवादसिद्धान्तस्य प्रवर्तकोऽभिनवगुप्तो भट्टनायकाभिमतं भावकत्व-भोजकत्वव्यापारद्वयं निषिध्य अभिव्यञ्जनावादं प्रतिष्ठापयति । स च रसनिष्पत्तिः इत्यस्य रसाभिव्यक्तिः इत्यर्थं स्वीकरोति । रसगङ्गाधरग्रन्थे प्रतिपादितदिशाऽभिनवगुप्तप्रकटितं रसस्वरूपं यथा - 'समुचितललित-सन्निवेशचारुणा काव्येन समर्पितैः, सहृदयहृदयं प्रविष्टैः, तदीयसहृदयतासहकृतेन, भावनाविशेषमहिम्ना, विगलितदुष्यन्तरमणीत्वादिभिरलौकिकविभावानुभावव्यभिचारिशब्दव्यपदेश्यैः, शकुन्तलादिभिरालम्बनकारणैः, चन्द्रिकादिभिरुद्दीपनकारणैः, अश्रुपातादिभिः कार्यैः, चिन्तादिभिः सहकारिभिश्च, सम्भूय प्रादुर्भावितेनालौकिकेन व्यापारेण, तत्कालनिवर्तितानन्दांशावरणाज्ञानेनात एव प्रमृष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा, स्वप्रकाशतया वास्तवेन, निजस्वरूपानन्देन सह गोचरीक्रियमाणः प्राग्विनिविष्टवासनारूपो रत्यादिरेव रसः ।' अस्य व्याख्यापि प्राप्यते, यत् – 'काव्ये नाट्ये च कारणकार्यसहकारिणः विभावानुभावव्यभिचारभावशब्दव्यवहार्या भवन्ति । सामाजिकाः (सहृदयाः) विभावादीन् दृष्ट्वा अयं एतद्विषयकरतिमान् इयं एतद्विषयकरतिमती, इत्थं रत्यादिस्थायिभावानां अनुमानेऽभ्यासपटवो भवन्ति । एतस्यां स्थितस्य विभावादयो विशिष्टरूपेण न प्रतीयन्ते किन्तु 'ममैवैते, न ममैवैते, तस्यैवैते, न तस्य' इत्यादिसम्बन्धो न तिष्ठति, यतस्ते विभावादयः साधारण्येन प्रतीयन्ते । विभावादिगतस्य, सामाजिकहृदये वासनात्मकतया स्थितस्य च स्थायिभावस्य साधारण्यं सम्पद्यते साधारणोपायबलात् । तेनैव साधारण्येन प्रमातुः सहृदयस्य च परिमितप्रमातृभावो विगलति । इत्थं साधारणीकृतस्य सामाजिकहृदये वासनात्मकतया स्थितस्य विभावादिभिरभिव्यक्तीकृतस्य स्थायिभावस्य विगलितपरिमितभावेन प्रमात्रा प्रपाणकरसन्यायेन वेद्यान्तरसम्पर्कशून्यब्रह्मास्वाद-सहोदरपरमानन्दरूपेणानुभूयते । इत्थं सामाजिकहृदये एवाऽऽनन्दात्मकरूपेण उपरि प्रस्तुतया प्रक्रियया अभिव्यक्तीभूतः स्थायिभाव एव रसः, योऽनुभूतिसमये अलौकिक चमत्कारकारी भवती'ति ।

अभिनवगुप्ताचार्यो रसं व्यङ्ग्यं मनुते । रसो व्यञ्जनया सहृदयं प्रभावयति । रसास्वादनश्च सहृदयानामेव । अत्र संयोगशब्देन व्यङ्ग्यव्यञ्जकसम्बन्धो गृह्यते । स्थायिभावो व्यङ्ग्यः । विभावादयश्च व्यञ्जकाः । व्यञ्जनाया विभावनव्यापारेण विभावानां स्थायिभावानां च साधारणीकरणं भवति । एवं रामाद्यनुकार्याणां भावा वैशिष्ट्यविरहिताः सन्तः सहृदयानां हृदि विद्यमानान् वासनारूपभावान् उद्बोधयन्ति । तन्मतानुसारं 'न ह्येतत् चित्तवृत्तिवासनाशून्यः कश्चित् प्राणी भवति ।' वासनैषा सुप्तावस्थायां विद्यमाना अभिनयादिभिः काव्यार्थे प्रकाशिते जागर्ति । यथा मृद्गन्धो जलसेचनेन प्रादुर्भवति, तथैव वासनाया उदयो जायते । साधारणीकरणमाध्यमेन सुषुप्तः स्थायिभावो निर्वैयक्तिकरूपेणाभिव्यक्तः सन् आनन्दास्वादं कारयति, स एव रसास्वादः । रसानुभूतिरियं सामान्यानुभूतिभिन्नत्वाद् सर्वजनवेद्यत्वाच्च अलौकिकी कथ्यते । अत्र

सम्बन्धविशेषस्य परिहारः । अभिनवगुप्तस्य मतमेतत् शैवाद्वैतवादम् आनन्दवादं वा आश्रित्य प्रवर्तते । अस्य मतमिदं दर्शनमूलत्वात् मनोवैज्ञानिकचिन्तनपरत्वात् यथार्थभावेन रसविश्लेषणाच्च अधुनापि सर्वैः काव्यतत्त्वज्ञैः स्वीक्रियते च ।

**रसभेदाः**

रसभेदविषये पौरस्त्यकाव्यशास्त्रिणां मतैक्यं नास्ति । कतिपये काव्यशास्त्रिण रसस्याष्टभेदान् परिगणयन्ति, कतिपये नवरसान् स्वीकुर्वन्ति चेत् कतिपये वत्सलं भक्तिं च रसत्वेन गृह्णन्ति । रसभेदा निम्नानुसारेण प्रदर्श्यन्ते -

**शृङ्गाररसः -** नायकनायिकारूपालम्बनेन, ऋतु-माल्य-चन्द्रोपवनादि उद्दीपनैः उद्बुद्धः, भ्रूविक्षेप-कटाक्षादिकायिकानुभावैः, मधुर-ललित-वचनरूपवाचिकानुभावैः स्वेदरोमाञ्चादिसात्त्विकानुभावैः प्रतीतियोग्यः, लज्जा-औत्सुक्यादिव्यभिचारिभिः परिपुष्टोः रतिरूप स्थायिभावस्यास्वादः शृङ्गार रस: । (नाट्यशास्त्रम्, ६/४७) । तत्र शृङ्गारस्य द्वौ भेदौ - सम्भोगो विप्रलम्भश्च । तत्र सम्भोगः परस्परावलोकनालिङ्गनाधरपानचुम्बनाद्यनन्तत्वात् अपरिच्छेद्य एक एव गण्यते । विप्रलम्भस्तु-पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यात् (साहित्यदर्पणः ३/८७) ।

**हास्यरसः -** विकृतवेषाद्यालम्बनैस्तथा विकृताऽलङ्काराद्युद्दीपनैरुद्बुद्धः, असत्प्रलापाश्रुपाताद्यनुभावैः प्रतीतियोग्यः कृत: श्रमादिव्यभिचारिभिः परिपुष्टो हासरूपस्थायिभावस्याऽऽस्वादो हास्यरस: । रसोऽयं द्विविधो भवति । आत्मस्थः परस्थश्चेति । यदा स्वयं हसति तदाऽऽत्मस्थोऽयं रसस्तथा यदा अन्यजनान् हासयति तदा परस्य हास्यो भवति । पुनरुभयोः स्मित-हसित-विहसित-उपहसित-अपहसित- अतिहसितादयः षड्भेदाः भवन्ति । पुनरेतेषां उत्तममध्यमाधमभेदेनानेकभेदाः भवन्ति (नाट्यशास्त्रम्, ६/५०-६१ ) । अत्र विकृत वाग्वेषादिदर्शनेऽवश्यं हासोदयात् हासप्रकृतिको रसः सामाजिकेषु व्यज्यते ।

**करुणरसः -** धनस्वजनादिविनाशरूपालम्बनैस्तेषां गुणादिरूपोद्दीपनैरुद्बुद्धः, अश्रुपातवैवर्ण्याद्यनुभावैः प्रतीतियोग्यः कृत: निर्वेद-ग्लानि-दैन्यादिव्यभिचारिभिः शोकरूपस्थायिभावस्याऽऽस्वादः करुणरसो भवति । (नाट्यशास्त्रम्, ६/६२) अत्राभिज्ञके सामाजिके शोकः प्रकृतिकः करुणो रसो व्यज्यते ।

**रौद्ररसः -** क्रोधस्थायिभावको द्विषदालम्बनकस्तदपकाराद्युद्दीपितो विकत्थनाद्यनुभावितो गर्वादिसञ्चारितो रौद्ररसो भवति । अत्रोपकारिणो आलम्बनम्, अस्त्रादिप्रदर्शनमुद्दीपनं, प्रतिज्ञा अनुभावः, अन्यनैरपेक्ष्यगम्यगर्वो व्यभिचारिभावः । क्रोधः स्थायिभावः तदभिज्ञे सामाजिके क्रोधप्रकृतिको रौद्रो रसो व्यज्यते (नाट्यशास्त्रम्, ६/६४) ।

**वीररसः -** उत्साहस्थायिभावको द्विषद्विद्वज्जनादीनालम्बनकोऽपकारगुणाद्युद्दीपितः प्रतीकार-करणदानाद्यनुभावितो हर्षावेगचिन्तादिसञ्चारितो वीररसो भवति । तत्र शत्रुविद्वज्जन-दीनाद्यालम्बनैस्तथाऽपकार-गुण-कष्टाद्युद्दीपनैरुद्बुद्धः, शौर्यदानदयाद्यनुभावैः प्रतीतियोग्यः, एवमावेग-हर्ष-चिन्तादिसञ्चारिभिः परिपुष्टः उत्साहरूपस्थायिभावस्य आस्वादो वीररसो भवति (नाट्यशास्त्रम्, ६/६७) । स च वीरो दानवीरो धर्मवीरो दयावीरश्चेति चतुर्विधः (साहित्यदर्पणः ३/२३४) ।

**भयानकरसः -** विकट-हिंसकाद्यालम्बनैः विकट-कर्माद्युद्दीपनैरुद्बुद्धः, कम्पन-पलायन-आह्वान-वैवर्ण्याद्यनुभावैः प्रतीतियोग्यः कृतः । आवेग-त्रास-अपस्मारादिव्यभिचारिभिः परिपुष्टो भयरूपस्थायिभावस्याऽऽस्वादो भयानकरसः । एवञ्च भयस्य स्थायिभावको विकटाद्यालम्बनकः, तद्विकटकर्माद्युद्दीपितः पलायनाद्यनुभावितो जड़तादि-सञ्चारितो भयानकरसः (नाट्यशास्त्रम्, ६/६९) ।

**बीभत्सरसः -** अनभिमतविण्मूत्राद्यालम्बनैर्दुर्गन्धाद्युद्दीपनैरुद्बुद्धः, निष्ठीवन-उद्वेजन-रोमाञ्चाद्यनुभावैः प्रतीतियोग्यः एवं आवेगग्लान्यादिव्यभिचारिभिः परिपुष्टः जुगुप्सारूपस्थायिभावस्याऽस्वादः वीभत्सरसो भवति । तत्तु जुगुप्सा स्थायिभावको विण्मूत्राद्यालम्बनको दुर्गन्धाद्युद्दीपितो निष्ठीवनाद्यनुभावितो ग्लान्यादिसञ्चारितो वीभत्सो रसः (नाट्यशास्त्रम्, ६/७३) ।

**अद्भुतरसः -** दिव्य-दर्शन-माया-इन्द्रजालादिविस्मयजनककर्मरूपावलम्बनैः कर्मरूपावलम्बनैरुद्बुद्धः, निर्निमेषदर्शन-साधुवादप्रदान-रोमाञ्चादिव्यभिचारिभिः परिपुष्टो विस्मयरूपस्थायिभावस्याऽस्वादः अद्भुतरसो भवति । विस्मयस्थायिभावको विस्मयजनककर्मकर्त्रालम्बनको विस्मयकर्माद्युद्दीपितश्चकिताद्यनुभावितो हर्षादिसञ्चारितोऽद्भुतरसः तदभिज्ञे सामाजिके व्यज्यते (नाट्यशास्त्रम्, ६/७५) ।

**शान्तरसः -** तत्त्वज्ञानकारणमिथ्यारूपेण ज्ञातसंसाराद्यालम्बनैस्तथा तपोवनाद्युद्दीपनैरुद्बुद्धः सुखदुःखे समदर्शनाद्यनुभावैः प्रतीतियोग्यः, एवं मतिधैर्यहर्षादिव्यभिचारिभिः परिपुष्टः तत्त्वज्ञानजनितनिर्वेदरूपस्थायिभावस्याऽऽस्वादः शान्तरसो भवति । शान्तरसे दुःख-सुख-चिन्ता-द्वेष-रागादयो विषया केऽपि न भवन्ति । अत्र सर्वेषु भावेषु शमप्राधान्यं संलक्ष्यते (साहित्यदर्पणः ३/२४९) ।

**वात्सल्यरसः -** विश्वनाथेन मुनीन्द्रसम्मतो वत्सलः रसरूपेण प्रतिपादितः । भरतादय उत्कटं चमत्कारजनकतया वत्सलं रसं स्वीकुर्वन्ति । अत्र वत्सलतारूपः स्थायिभावः, पुत्रः, आदिशब्दात् अनुजतनुजादिकस्यालम्बनं मतम् । तस्य पुत्रादेश्चेष्टा-खेलनकूर्दनहास्यादिः, विद्याशास्त्रादिज्ञानम्, शौर्यवीरत्वम् उदयो वित्तोपार्जनादिभिरुन्नतिः सेवादयस्योद्दीपनविभावाः । आलिङ्गनाङ्गस्पर्श-शिरशुम्बन-अवलोकन-पुत्रक-हर्षाश्रुप्रभृतयोऽनुभावा भवन्ति । अनिष्टस्याशङ्का हर्ष-गर्वादयोऽस्य व्यभिचारिणः, एभिः संयोगः

वात्सल्य-स्नेहरूपः स्थायिभावो वत्सलरसरूपे परिणतो भवति (साहित्यदर्पणः ३/२५१) । अन्येभ्यो रसेभ्योऽस्य रसस्यानुभूतिः पृथगेव भवति, अतोऽस्य रसस्य सत्ताऽपि स्वीकर्तुं शक्यते।

कतिपये काव्यशास्त्रिणो भक्तिमपि रसरूपेण विवेचनं कुर्वन्ति। भगवान् एवं तस्य वल्लभरूपालम्बनविभावैः, भगवतः गुण-चेष्टा-प्रसाधन-तुलसी-चन्दनाद्युद्दीपनविभावैः, नृत्य-गीत-अश्रुपात-नेत्रनिमीलनाद्यनुभावैः, निर्वेदादिव्यभिचारिभिः भगवदाकारात्मक-प्रेमस्वरूपस्थायिभावेन साक्षात् परमानन्दस्वरूपभक्तिरसः अभिव्यज्यते। भगवदकारतारूपो रत्याख्यः स्थायिभावः परमानन्दसाक्षात्कारात्मक प्रादुर्भवति (मिश्र, २०२२, पृ.७१) ।

विश्वनाथस्य साहित्यदर्पणानुसारेण रसभेदान् स्थायिभावादीन् च तालिकायामपि प्रदर्शयितुं शक्यते -

| क्र.सं. | रसाः | स्थायिभावाः | वर्णाः | दैवतः |
|---|---|---|---|---|
| १. | शृङ्गारः | रतिः | श्यामः | विष्णुः |
| २. | हास्यः | हासः | श्वेतः | प्रमथः |
| ३. | करुणः | शोकः | कपोतः | यमः |
| ४. | रौद्रः | क्रोधः | रक्तः | रुद्रः |
| ५. | वीरः | उत्साहः | हेमः | महेन्द्रः |
| ६. | भयानकः | भयम् | कृष्णः | कालः |
| ७. | बीभत्सः | जुगुप्सा | नीलः | महाकालः |
| ८. | अद्भुतः | विस्मयः | पीतः | गन्धर्वः |
| ९. | शान्तः | शमः | सुन्दरछायः | नारायणः |
| १०. | वत्सलः | वत्सलतास्नेहः | पद्मगर्भछविः | लोकमातरः |

अनेन प्रकारेण विश्वनाथेन स्वकीये लाक्षणिके ग्रन्थे साहित्यदर्पणे विविधानां रसानां स्थायिभावानां वर्णानां दैवतानाञ्च चर्चा विहिता।

**निष्कर्षः**

संस्कृतकाव्यशास्त्रपरम्परायां विविधाः सिद्धान्ताः प्रतिपादिताः सन्ति । काव्यरचनायाः सन्दर्भे रचितानां काव्यानां पर्यालोचनसन्दर्भे च काव्यसिद्धान्ता उपयोगिनो भवन्ति । पौरस्त्यकाव्यपरम्परायां रसध्वनिगुणरीतिवक्रोक्त्यौचित्यालङ्कारसिद्धान्ताः समादरणीया विद्यन्ते । काव्यं रमणीयं विधातुं काव्यशास्त्रस्य ज्ञानमावश्यकं भवति, काव्यविश्लेषणमपि काव्यसिद्धान्तस्याधारेणैव विधीयते ।

संस्कृतकाव्यशास्त्रे कतिपये आचार्या काव्यस्य बाह्यसौन्दर्यसमेधकानामलङ्कारादितत्त्वानां प्राधान्यं प्रस्तुवन्ति चेत् कतिपयेऽभ्यन्तरसौन्दर्यपरिपोषकानां रसादितत्त्वानां प्राधान्यं प्रदर्शयन्ति । बाह्याभ्यन्तरिकानां तत्त्वानां सम्मेलनेनैव काव्यं रमणीयं जायते । प्रथमशतकोत्पन्नेन भरतमुनिना प्रतिपादितं रससूत्रमाधारीकृत्य बहुभिराचार्यैं रसविषयिणी व्याख्या विहिता । रससम्प्रदायस्य प्रकाशनेऽभिनवगुप्तस्य विशेषं योगदानं दृश्यते । अनन्तरं मम्मट-धनिक-विश्वनाथ-जगन्नाथप्रभृतय आचार्या रसानुभूतिमानन्दमयतां स्वीकृतवान् । विश्वनाथेन करुणादौ रसेऽपि आनन्दमयत्वं प्रतिपादितम् । आचार्यैरानन्दमये रसेऽखण्डत्वं स्वप्रकाशत्वं चिन्मयत्वं विद्यान्तरस्पर्शशून्यत्वं ब्रह्मास्वादसहोदरत्वं लोकोत्तरचमत्कारत्वं च प्रकाशितम् ।

भरतमुनितो विकसितोऽयं रससम्प्रदायः षोडशशताब्देः जगन्नाथपर्यन्तं विशेषेण विकसितः । तदन्वपि पश्चाद्वर्तिभिर्विविधैः काव्यशास्त्रिभिरधुनापर्यन्तमपि केनापि प्रकारेण रससम्प्रदायस्य व्याख्यानं विश्लेषणं च विधीयमानं संलक्ष्यते । कतिपये आचार्या रसं काव्यस्यात्मानं स्वीकुर्वन्ति । तत्र भरतमुनिः 'न हि रसादृते केचिदर्थः प्रवर्तते' इति रसं महत्तया प्रकाशयति । अग्निपुराणेऽपि 'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्' इति प्रतिपादितो दृश्यते । तथैव ध्वनिकारेणानन्दवर्धनेनापि 'काव्यस्यात्मा ध्वनिः' इत्युक्त्वा रसध्वनिमेव काव्यस्यात्मात्वेन स्वीकृतः । असौ 'कविना प्रबन्धमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम्' इत्यपि कथयति । आचार्यो मम्मटोऽपि वस्त्वलङ्काररसध्वनिषु रसध्वनिमेव काव्यस्यात्मारूपेण स्वीकरोति । विश्वनाथः 'वाक्यं रसात्मकं काव्यम्' इति प्रतिपादयति । प्रथमम् आदिकाव्ये रामायणे प्रस्तुतं 'मा निषाद प्रतिष्ठा....' इति श्लोकमाधारीकृत्य रससिद्धान्तस्य व्याख्या विहिता दृश्यते । मूलतो रसः काव्यस्याभ्यन्तरिकमनिवार्यं तत्त्वम् । रसस्तु काव्यस्य जीवनमेव । अस्याभावे काव्यं निरसं वैचित्र्यमात्रं च संलक्ष्यते । सर्वैरपि काव्यशास्त्रिभिः यत्केनापि प्रकारेण काव्ये रससत्ता स्वीकृता । रसरहितं काव्यं चमत्कारजनकं सहृदयहृदयाह्लादं च न भवति, अतः काव्यशास्त्रपरम्परायां रससिद्धान्तस्य महत्त्वपूर्णमवदानं संलक्ष्यते ।

## सन्दर्भग्रन्थसूची

अमरसिंहः (२०४४), *अमरकोशः*, तृ.सं., चौखम्बा संस्कृत प्रतिष्ठान ।

आचार्य, लक्ष्मीप्रसाद (२०५३), *रससागर–सोपान*, लक्ष्मी साहित्य प्रकाशन ।

आनन्दवर्धन (ई.२००६), *ध्वन्यालोकः,* चौखम्बा संस्कृत सिरिज अफिस ।

उपाध्याय, केशवप्रसाद ( २०५५), *पूर्वीय काव्यसिद्धान्त*, तृ.सं., साझा प्रकाशन ।

उपाध्याय, बलदेव (ई.१९९२), *संस्कृत साहित्यका इतिहास* (दशम सं.), शारदा निकेतन ।

जगन्नाथः (२०१२), *रसगङ्गाधरः*, चौखम्बा विद्याभवन।

भट्टाचार्यः, कान्तिचन्द्र (२०६७), *काव्यदीपिका* (टीका - वेणीमाधवढकालः), विद्यार्थी पुस्तक भण्डार,

भरतमुनिः (ई. १९४३), *नाट्यशास्त्रम्,* (व्या.पं.केदारनाथ), सत्यभामावाई पाण्डुरङ्ग।

मम्मटः (ई.१९९४), *काव्यप्रकाशः* (द्वि.सं.), (व्याख्या – वासुदेव शास्त्री अभ्यंकर), चौखम्बा विद्याभवन।

मिश्रः, जगदीशचन्द्रः, (ई. २०२२), *संस्कृतकाव्यशास्त्रेतिहासः*, चौखम्बा सुरभारती प्रकाशन।

मिश्रः, रामचन्द्र (ई.२०१०), *संस्कृतसाहित्येतिहासः*, चौखम्बाविद्याभवन।

राजवंश सहाय ‘हीरा’ (ई.२००२), *संस्कृत साहित्य-कोश* (च.सं.), चौखम्बा विद्याभवन।

विश्वनाथः (ई.१९९५), *साहित्यदर्पणः* (पञ्चम सं.), कृष्णदास अकादमी।